संस्कृत 17

र. नं. ११६

स्तोत्र

गणेश स्तवराज 57

२५/ स्तो. ३५

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥अथगणेशस्तवराजप्रारंभ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(२)

श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः॥ ॐगणेशायप्रचंडायवक्रतुंडायदंष्ट्रिणे॥ विघ्ने
श्वरायवीरायवरदायनमोनमः॥१॥ मनसाकर्मणावाचायेप्रपन्नाविनायकं॥ तेत
रंतिमहाघोरंसंसारंकामवर्जिताः२॥ ब्रह्मोवाच॥ भगवन्श्रोतुमिच्छामिविस्तरेणयथा
तथं॥ स्तवराजस्यमाहात्म्यंस्वरूपंचापितादृशं॥३॥ नंदिकेशउवाच॥ स्तवराजस्य
माहात्म्यंप्रवक्ष्यामिसमासतः॥ यत्फलंलभतेजस्वास्वरूपंचापितादृशं॥४॥ यः
प्रातरुत्थितोविद्वान्ब्राह्मेवापिमुहूर्त्तके॥ विषुवायनकालेवापुण्येवासमयांतरे॥५
सर्वदावाजपेज्जंतुस्तवराजंस्तवोत्तमं॥ यत्फलंलभतेसद्यस्तच्छृणुष्वचतुर्मुख॥६॥
गंगाप्रवाहवत्तस्यवाग्विभूतिर्विजृंभते॥ बृहस्पतिसमोबुध्यापुरंदरसमःश्रिया॥७
तेजसादीप्तसंकाशोभार्गवेणसमोनये॥ धनदेनसमोदानेतथावित्तपरिग्रहे॥८॥ ध
र्मराजसमोमान्योशिवभक्त्तोमयासमः॥ प्रतापेवन्हिसंकाशःप्रभायांशशिनासमः॥

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

ग० ॥९॥ बलेनमरुतातुल्योभवताब्रह्मवर्चसा॥ शिवतत्त्वार्थविज्ञानेमयाचसमतांव्रजेत् स्तो०
॥१॥ ॥१०॥ एवमेतत्त्रिसंध्यंवैजपेत्स्तवमनुत्तमं॥ सर्वान्कामान्नरःप्राप्यभुक्त्वाभोगान्यथे
प्सितान्॥११॥ सशरीरःसुरेंद्रस्यपदंन्यस्यचमूर्द्धनि॥ प्राप्याष्टगुणमैश्वर्यंभुक्त्वाभो
(2A) गान्यथेप्सितान्॥१२॥ अक्षयंवीतशोकश्चनिरातंकोनिरामयः॥ जरामरणनि
र्मुक्तोवेदशास्त्रार्थकोविदः॥१३॥ सिद्धचारणगंधर्वैर्यक्षविद्याधरादिभिः॥ संस्तू
यमानोमुनिभिःशंसमानोदिनेदिने॥१४॥ विचरत्यखिलांल्लोकान्बंधुवर्गैःसमा
हितः॥ एवंचिरायुर्निर्वाणेदेवस्यानुचरोभवेत्॥१५॥ स्तवराजंसकृज्जप्त्वामुच्यतेस
र्वपातकैः॥ सर्वसिद्धिमवाप्नोतिपुनात्यासप्तमंकुलं॥१६॥ स्तवराजमनुस्मरन्जपन्हृ
दयाग्रेविलिखन्पठन्नपि॥ ससुरासुरसिद्धचारणैर्मुनिभिःप्रसह्यमेवपूज्यते॥ ॥१॥
॥१७॥ नरतिंचभवचक्रंमोहनंसंनिहंतिक्षिपतिचपरिवादंमान्यतेबंधुवर्गैः॥

(3)

ग० अखिलमपिचलोकंक्षेमत्तामाशुनीत्वाव्रजनियतिभिरीड्यंशाश्वतंधाममर्त्यः स्त०
॥२॥ ॥१८॥ योजपतिस्तवराजमशेषंक्षेमतमंपदमेतिमनुष्यः॥ सिद्धचारणसुरैरपिवं
द्योयातिपदंपरमंसुविमुक्तः॥१९॥ जपतिस्तवराजाख्यमिमंप्राज्ञस्तवोत्तमं॥ त
स्यापराधंक्षमतेसर्वदैवविनायकः॥२०॥ ॥ सर्वंनिहंतियेविघ्नंजपेत्स्तवंसमंततः॥–
अशेषाभिर्गणाध्यक्षःसंपद्भिरभिषिंचति॥२१॥ तस्यचप्रणताल्लक्ष्मीःकटाक्षानुवि
धायिनी॥ किंकरोमीतियेभातापुरस्तात्तस्यतिष्ठति॥२२॥ तस्मान्निःश्रेयसंगंतुमभि
लष्यंन्विचक्षणः॥ स्तवराजंजपेद्भक्त्याधर्मकामार्थमुक्तये॥२३॥ आधिव्याध्यभि
शस्त्रादितमःपंकाहवादिषु॥ भयेष्वन्येषुचाप्येतंस्मरन्मुक्तोभवेदिह॥२४॥ स्तवराजंज
पित्वायोमार्गंगच्छतिमानवः॥ नजातुजायतेतस्यचोरव्याघ्रादिभिर्भयं॥२५॥ यथा
देवोवरिष्ठोयमशेषाणांविनायकः॥ तथास्तवोवरिष्ठोयंस्तवानांब्रह्मनिर्मितः॥२६ ॥२॥

(3A)

भवनीर्णोयदादेवो विघ्नराजो विनायकः ॥ तदालोकोपकारार्थंमोक्तोयंशंभुनास्त
वः ॥ २७ ॥ विनायकप्रियकरोदेवस्यहृदयंगमः ॥ जप्यस्तवोयंप्राज्ञेनधर्मकामा
र्थमुक्तये ॥ २८ ॥ इत्युक्तंस्तवराजस्यमाहात्म्यंचतुरानन ॥ अस्यस्वरूपमधुनाश्रृ
णुशंभुनिरूपितं ॥ २९ ॥ ॐअस्यश्रीविनायकस्तवराजस्तोत्रमंत्रस्य ॥ महादेवऋषि
गायत्र्युष्णिगनुष्टुप् बृहतीपंक्तित्रिष्टुप्जगती विराट्मालिनीभुजंगप्रयातशार्दू
लविक्रीडितानिनानाछंदांसि ॥ श्रीमहागणपतिर्देवता ॥ ॐकारममृतमितिबीजं
वक्रतुंडायधीमहीतिशक्तिः ॥ यःस्वयंसर्वतःसाक्षीतिकिलकं ॥ ममसकलमनोर
थसिध्यर्थंश्रीगणपतिप्रीत्यर्थंजपेविनियोगः ॥ ॐ नमोभगवतेविघ्नेश्वरायॐ
काररूपिणेविधिरूपिणेअंगुष्ठाभ्यांनमः ॥ ॐ नमोभगवतेविघ्नेश्वरायॐकारमू
र्तयेतर्जनीभ्यांनमः ॥ ॐ नमोभगवतेविघ्नेश्वरायवक्रतुंडायनमोमध्यमाभ्यांन

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(५)

ग० मः ॥ ॐ नमोभगवतेविघ्नेश्वरायसर्वसिद्धिविनायकाय अनामिकाभ्यां नमः ॥ स्त०
॥२॥ ॐ नमोभगवतेविघ्नेश्वरायविघ्नेश्वरायकनिष्ठिकाभ्यांनमः ॥ ॐ नमोभगवतेवि
घ्नेश्वरायदेवाधिदेवायकरतलकरपृष्ठाभ्यांनमः ॥ एवंहृदयादि ॥ अथ ध्यानं ॥ कनकस
दृशावर्णस्वर्णलक्ष्मीमदंतंगजमुखमहोक्षंचंचलत्कर्णयुग्मं ॥ अभयवरदहस्तंपा
शतीक्ष्णांकुशाढ्यं ॥ गजमुखमहमीशंसिद्धिदंतंनमामि ॥ १ ॥ बीजापूरगदेक्षु-
कार्मुकरुचाचक्राब्जपाशोत्पलव्रीह्यग्रस्वविषाणरत्नकलशोत्प्रोद्यत्कराम्भोरुहः ॥ ध्ये
यो वल्लभयासपद्मकरयाश्लिष्टोज्ज्वद्भूषया ॥ विश्वोत्पत्तिविनाशसंस्थितिकरो विघ्नो
विशिष्टार्थदः ॥ २ ॥ बीजपूरंमरुद्वीर्यंपूजयित्वापराङ्कयं ॥ सगदं विघ्नराजेंद्रंवंदेविघ्नोप
शांतये ॥ ३ ॥ गजवक्त्रंगजाकारंरक्तवर्णवरप्रदं ॥ साधकस्यप्रसादार्थंपाशांकुशधरंशु ॥२॥
भं ॥ ४ ॥ वरदाभयहस्तंचध्यायेन्मदरसोत्कटं ॥ सिंदूरतोरक्तवर्णंकुंकुमारुणविग्रहं ॥

(5A)

।।५।।नागयज्ञोपवीतंच मेखलाकटिभूषणं।। नक्षत्रमालालंकारं सिध्दिदं सर्वकामदं।।६।। विनायकं हेमवर्णंन्चतुर्बाहुं त्रिलोचनं।। परशुपाशांकुशाभयहस्तं ध्यायेन्नरः सदा।।७।। ध्यायेद्गजाननं देवं तप्तकांचनसन्निभं।। चतुर्भुजं महाकायं सूर्यकोटिसमप्रभं।।८।। श्रीमहेश्वरउवाच।। ॐकारममृतं ब्रह्मशिवमक्षरमव्ययं।। यमामनंति देवशं तं प्रपद्ये विनायकं।।९।। यतः प्रवृत्तिर्जगतां यः साक्षी हृदये स्थितः।। आधारभूतो विश्वस्य तं प्रपद्ये विनायकं।।१०।। यस्य प्रभावाच्छक्राद्याः प्रीणंतिनिमिषंत्तिन्च।। प्रवर्त्तकस्त्कलोकानां तं प्रपद्ये वि०।।११।। शिवाग्रे द्वादशांगुल्यं स्थितं सूक्ष्मतनुं विभुं।। यजंति यं मरीच्याद्यास्तं प्र०।।१२।। विश्वेश्वरं विधातारं धातारं जगतामपि।। प्रणमामि गणाध्यक्षं तं प्र०।।१३।। लीलया लोकरक्षार्थं द्विधाभूतो महेश्वरः।। यः स्वयं सर्वतः साक्षी तं०।।१४।। उत्संगतल्ये यो देव्या भवान्याः क्रीडते

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

णामणिभिर्मौलिषु ॥ अमरावद्रुमन्यंतेतंप्रपद्ये० ॥ २५ ॥ वेदांतगीतंपुरुषंवरेण्यमभयप्र-
दम् हिरण्मयपुरांतस्थंतंवयंशरणंगताः ॥ २६ ॥ चित्सदानंदसन्मात्रंपरमानंदरूपि
णम् ॥ निष्कलंनिर्मलंसाक्षाद्दिनायकमुपैमितम् ॥ २७ ॥ अनपायसमुद्भूतंभू-
तिदंभूतिवर्धनम् ॥ नमामिसत्यविज्ञानमनंतंविघ्नरूपिणम् ॥ २८ ॥ अनाद्यंतं
महादेवप्रियपुत्रंमनोहरम् ॥ द्विपाननंपरमंसाक्षादात्मानंतंनमाम्यहम् ॥ २९ ॥
विश्वसारस्वतावेद्यंश्रीधरंजगतामपि ॥ प्रणमामिगणाध्यक्षंप्रणताज्ञानमोच
नम् ॥ ३० ॥ शिखाग्रेद्वादशांगुल्येस्थितंस्फटिकसन्निभम् ॥ गोक्षीरधवलाका
रंतमस्मिशरणंगतः ॥ ३१ ॥ अनाधारमनाधेयमनंताऽधारसंस्थितं ॥ धातारंच
विधातारंनमस्मिशरणंगतः ॥ ३२ ॥ अनंतदृष्टिंलोकादिमनंतंविद्रुमप्रभम् ॥
अप्रतर्क्यमनिर्देश्यंनिरालंबंनमाम्यहम् ॥ ३३ ॥ प्रमाणप्रत्ययोपेतंहंसमव्यक्त

(5)



विभुः॥ बालोहरन्मनस्तस्यास्तंवंदेगणनायकं॥ १५॥ विधाय भूषणेश्चित्रैर्वेशाके
श्चमनोहरैः॥ यंदृष्ट्वाहृष्यतीशानस्तंवंदेगण०॥१६॥ सिंदूरितमहाकुंभस्कंगदंतस्तु
भैरवः॥ योदैत्यकरिणांभेत्तानौमितंद्विरदाननं॥१७॥ यस्यमूर्ध्निव्रजंत्याशुमहामोद
निषंगिणः॥भ्रमरास्तीर्णसंसारास्तंनौमिद्विरदाननं॥१८॥ गंभीरभेरिनिनदंश्रुत्वाय
द्धृंहितंक्षणात्॥ पतंतिस्फुरनागेंद्रास्तंनौमिद्विरदाननं॥१९॥ योभिनत्तिगिरीन्सर्वानि
घोरनिघत्तिभैरवैः॥ रवैःसंत्रासजननैस्तंनौमिद्विरदाननं॥२०॥लीलयापद्दतायेनपादा
भ्यांधरणीक्षणात्॥ विशीर्यतिसशैलाद्यातंनौस्मिगजाननं॥२१॥ यत्करोत्ताडनेभिन्नि
मंभः शतसहस्रधा॥ विशीर्यंतिसमुद्राणांतंप्रपद्येविनायकं॥२२॥ विमुखायत्रदृश्यंतेभ्र
ष्टराज्याःपदच्युता॥ निःप्रभाविबुधाःसद्यस्तंप्रपद्येविनायकं ॥२३॥ यद्भ्रूवामहितांल
क्ष्मींलभंतेवासवादयः॥ स्वतंत्रमेकनेतारंतंप्रपद्येवि०॥२४॥ यत्पादपांसुनिचयंबिभ्रा

(6)

म.

५

ऽक्षणम् ॥ अनाविलमनाकारं तमस्मिशरणंगतः ॥ ३४ ॥ भूतनाथंजगद्योनिंमु स्तः

नीनांचमनोहरम् ॥ स्वयंवेद्यमवेद्यंतंवेदाद्यंतंनमाम्यहम् ॥ ३५॥ सर्वाकारमना

कारं विश्वावासमनामयम् ॥ सकलंनिष्कलंनित्यंनंगणेशंनमाम्यहम् ॥ ३६॥ सं

सारवैद्यंसर्वज्ञं सर्वभेषजभेषजम् ॥ आत्मानंसदसद्व्यक्तंधातारंतंनमाम्यहम्॥

३७॥ भ्रूमध्येसंस्थितंदेवंनादमध्येप्रतिष्ठितम्॥ हनुमध्येदीपवत्संस्थंवंदेस-

र्वस्यमध्यगम् ॥ ३८॥ हृत्पुंडरीकनिलयंसूर्यमंडलसंस्थितम् ॥ तारकांतरसंस्था

नंतारकंतंनमाम्यहम् ॥ ३९ ॥ तेजस्विनंविकर्तारंसर्वकारणकारणम् ॥ ज्ञानगम्य

महंवेदप्रणवप्रतिपादकम् ॥ ४०॥ अंतर्योगगतंयुक्तैः कल्पितंस्वस्तिकासनैः ॥ ब

हद्हृत्कर्णिकामध्येध्यानगम्यंनमाम्यहम् ॥ ४१॥ ज्ञेयंदुर्ज्ञेयमद्वैतंत्रिसारंचत्रि- ५

लोचनम् ॥ आत्मानंत्रिपुरारातेःप्रियसूनुंनमाम्यहम् ॥ ४२॥ स्कंदप्रियंस्कंदगु

(6A)

स्कंदस्याग्रजमेवच ॥ स्कंदेनसहितंशश्वन्नमामिस्कंदवत्सलम् ॥ ४३ नमस्ते
विघ्नराजाय भक्तविघ्नविनाशिने ॥ विघ्नाध्यक्षायविघ्नानांनिहंत्रे विघ्नचक्षुषे ॥
४४ लंबोदर नमस्तुभ्यंसनतंमोदकप्रिय ॥ निर्विघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा ॥ ४५॥
विघ्नदात्रेह्यभक्तानां भक्तानांविघ्नहारिणे ॥ विश्वेश्वरायवीरायवरदायनमोनमः ॥
४६॥ किरीटिनेकुंडलिनेहारिणेमालिनेतथा ॥ नमोमौंजीसनाथायजटिनेब्रह्मचारि
णे ॥ ४७॥ दंडिमुंडायचंडायकमंडलुधरायच ॥ दंडिनेचैवमुंडायनमोध्ययनशक्त
ये ॥ ४८॥ वेदाध्ययनयुक्तायसामगानपरायच ॥ त्र्यक्षरायवरिष्ठायनमश्चंद्रशि
खंडिने ॥ ४९॥ कपर्दिनेकरालाय शंकरप्रियसूनवे ॥ स्तुतायहैमवत्याश्चनिहंत्रे
चस्तुरद्विषाम् ॥ ५०॥ ऐरावतादिभिर्दिव्यैर्दिग्गजैः संस्तुतायच ॥ यद्बृंहितपरि
त्रस्तैर्नमस्तेस्तुत्तिहेतवे ॥ ५१॥ कूष्मांडगणनाथायगणाध्यक्षायतेनमः ॥ वह्नि

(७)

ग. णाराधितोनित्यंवाञ्छिवञ्छनिवारिणे॥ ५२॥ पूष्णोदंतभिदेसाक्षाद्भरुनांभीषाणा स्त.
६ यच॥ ब्रह्मणश्वशिरोहंत्रेविवस्वद्बंधनायच ॥५३॥ अग्नेश्चैवसरस्वत्याइंद्र-
स्यचबलछिदे॥ भैरवायचभीमायभयानकरवायच ॥ ५४॥ विभीषणायभी
ष्मायनागाभरणधारिणे ॥ प्रमत्तायप्रचंडायवक्रतुंडायतेनमः॥५५॥ हेरंबा
यनमस्तुभ्यंप्रलंबजठरायच॥ अग्रुग्राहायदेवायएकदंतायतेनमः॥५६ शू
र्पकर्णायशूरायपरश्वधधरायच॥ नमस्तेस्तुणिहस्तायनमःपाशासिपाण-
ये॥५७॥ धारणायनमस्तुभ्यंधारणाभिरतायच॥ धारणाभ्याससक्तानांपु
रस्तात्संस्थितायच ॥५८॥ प्रत्याहारायवेतुभ्यंप्रत्याहाररतायच॥प्रत्या हा
ररतानांचप्रतिस्थानस्थितात्मने ॥५९ विद्याध्यक्षायदक्षायलोकाध्यक्षायधी ६
मते॥ भूताध्यक्षायभव्यायगणानांपतयेनमः॥ ६०॥योगपीठांतरस्थाययोगि

Digitization Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(९A)

नेयोगदायिने॥ योगिनांहृदिसंस्थाययोगगम्यायतेनमः॥ ६१॥ ध्यानायध्यान
गम्याय।शिवध्यानपरायच ॥ध्येयानामपिध्येयायनमोध्येयतमायते॥ ६२॥
सोमसूर्याग्निनेत्रायब्रह्मवेदमदांभसे॥ ब्रह्मांडकुंभपीठायसामघोषायतेन
मः॥ ६३॥ सप्तपातालपादायसमुद्रोपेतजंघिने॥ नमोदिग्बाहवेचैवव्योम-
हस्तायनेनमः॥ ६४॥ ज्योतिर्मंडलसंस्थायहृदयालानकायच॥ ध्यानिनांध्या
नगम्यायमूलाधारविवासिने॥ ६५॥ सोमार्कबिंबघंटायस्थविरायनिबोधि
ने॥ आकाशसरसीमध्येक्रीडागहनशालिने॥ ६६॥ सुमेरुकूटदंतायपृथुस्थू
लगमायच॥ सुघोषायसुभीमायकुंजरेश्वरभेदिने॥ ६७॥ हिमाद्रिकूटभेत्रेच
दैत्यदानवभेदिने॥ सर्वसिद्धिप्रदात्रेचनमःसर्वार्थदायिने॥ ६८॥ गजाकार
यदेवायगजराजायतेनमः॥ ब्रह्मणेब्रह्मरूपायब्रह्मगोप्त्रेव्ययायने॥ ६९॥ब्र

ह्मणे ब्राह्मणायैव ब्राह्मणप्रियसूनवे ॥ यज्ञाय यज्ञगोप्त्रे च यज्ञानां फलदायिने ॥ ७०॥
यज्ञहर्त्रे यज्ञकर्त्रे सर्वयज्ञमयाय च ॥ सर्वनेत्राधिवासाय सर्वैश्वर्यप्रदायिने ॥ ७१
तुभ्यं नमः परेशाय परात्परतराय च ॥ गुह्याशयाय गुह्याय योगिने ब्रह्मदायिने ॥
७२॥ एकाक्षरपरायैव मायिने ब्रह्मगामिने ॥ भूतानां च भवेशानां पतये पापहारि
णे ॥ ७३॥ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि ॥ तन्नो दंतिः प्रचोदयात् ॥ ७४
सर्वारंभान्निहंत्रे च विमुखानां निजार्तिते ॥ नमो नमो गणेशाय विघ्नेशाय नमो न
मः ॥ ७५ ॥ विनायकाय वै तुभ्यं विघ्ननाशाय नमो नमः ॥ नमस्तुभ्यं जगत्त्रात्रे नमस्तु
भ्यं वियोनये ॥ ७६॥ नमस्तुभ्यं त्रिनेत्राय त्रिनेत्रप्रियसूनवे ॥ सप्तकोटिमहा
मंत्रैर्मंत्रितावयवाय च ॥ ७७ ॥ मंत्राणां मंत्रिणे नित्यं मंत्राणां फलदायिने ॥ ली
लयालोकरक्षार्थं विभक्तनिजमूर्तये ॥ ७८ ॥ स्वयं शिवाय देवाय योगक्षेमानुका ७

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8A)

रिणे ॥ नमोनमः क्षमाभर्त्रेनमः क्षेमतरायच ॥ ७९ ॥ नमः क्षेमप्रतिष्ठायक्षीणदोषा
यतेनमः ॥ दयामयायदेवायसर्वभूतदयालवे ॥ ८० ॥ दयावर्त्तादयाकर्त्रेसर्वकर्त्रेन
मोस्तुते ॥ नमः कारुण्यदेवायवीरायशुभदंतिने ॥ ८१ ॥ नमस्तेवक्रतुंडायगज
दंतायतेनमः ॥ तुभ्यंनमः परेशायपरात्परतरायच ॥ ८२ ॥ नमोनमस्तेगणनाय
कायप्राणायकायाखिलनायकाय ॥ विनायकायाभयदायकायनमोनमस्तेस्तु
मनोन्मनाय ॥ ८३ ॥ गणाधिराजायगणानुशास्त्रेगणाधिराजायगजाननाय
॥ शलाननायाप्यमिनाननायनमोनमोदैत्यविनाशनाय ॥ ८४ ॥ अनामयाय
खिलधीमयायस्वमाययाविष्टजगन्मयाय ॥ अमेयमायाधिकसन्मयायन
मोनमस्तेस्तुमनोमयाय ॥ ८५ ॥ नमस्तेसमस्ताधिनाथायकर्त्रेनमस्तेसम-
स्तोरुविस्तारभाजे ॥ नमस्तेसमस्ताधिकायायभूम्नेनमस्तेपुनर्व्यस्तविन्य

(९)



स्तधाम्ने ॥८६॥ पात्रेस्फुराणांप्रमयेश्वराणांशास्त्रानुशास्त्रेचचराचरस्य ॥ ने
८ त्रेप्रनेत्रेचशरीरभाजांदात्रेवराणांभवतेनमोस्तु ॥ ८७॥ नमोस्तुतेविघ्न-
विनाशनायनमोस्तुतेभक्तभयापहाय ॥ नमोस्तुनेयुक्तमनास्थितायनमो-
स्तुभूयोगणनायकाय ॥८८॥ अखिलभुवनकर्त्रेसंपदामेकदात्रेनिखिल
तिमिरहंत्रेनिष्कलायाव्ययाय ॥ प्रणतमनुजभर्त्रेप्राणिनांप्राणदात्रेसकल
विबुधशास्त्रेविश्वनेत्रेनमोस्तु ॥८९॥ दशनकुलिशभिन्नैर्निर्गतैर्दिग्गजा
नांशुभ्रविकसितदंतंमौक्तिकैश्चंदगौरैः ॥ त्रिभुवनमुपसंतंप्रेक्ष्यगौरीभवं
तंस्फुटदमतिकराभ्यांश्लिष्यतेप्रेमसूनुं ॥ ९० ॥ मृदुनलिनस्फुशीतेतत्तदंकेभ
वान्याःशुभविलसितभावंनृत्यलीलांविधाय ॥ अचलदुहितुरंकादंकमन्यं- ८
विसर्पन्पितुरपिहरसित्वंनेत्रहर्षोपहारंम् ॥ ९१॥ भुजगवलयितेनोपस्पृश

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan ... Joint project ... Mumbai.

(9A)

नृपाणिनात्वांसरभसमथबाह्वोरंतरालेनिवेश्य ॥ सकलमधुरगीतंनृत्यमालो
कयंतंस्वयमपिचकरालंधूनुतेहस्तपादौ ॥ १२ ॥ कुवलयदलशीतैर्भूरिक-
ल्हारहृद्यैस्तदरुणसमगात्रैस्पर्शनैः संप्रहृष्यन् ॥ क्षिपतिचसकविशालेस्वां
कमध्येभवंतंनवसुकुरनुरागान्मूर्ध्निजिघ्रन्महेशः ॥ १३ ॥ बालोबालपराक्र-
मैः स्मरगणैः संप्रार्थ्यसेहर्निशंगायन्किंपुरुषांगनाविरचितैः स्तोत्रैरभिस्तू
यसे ॥ हाहाहूहुकतुंबरुप्रभृतिभिस्त्वंगीयसेनारदैः स्तोत्रैरद्भुतचेष्टितैः प्र
तिदिनंसंस्तूयसेसामभिः ॥ १४ ॥ त्वांनमंतिसुरसिद्धचारणास्त्वांयजंतिसकला
द्विजातयः ॥ त्वांपठंतिमुनयः पुराविदस्त्वांस्मरंतियतयः सनातनाः ॥ १५ ॥ परं-
प्रधानंपुरुषंमहांतंहिरण्मयंपौरुषयोगगम्यम् ॥ यमामनंत्यात्मभुवंमनीषिणो
विपश्चितंतंकविमक्षरंच ॥ १६ ॥ गणानांत्वागणनाथंसुरेंद्रंकविंकवीनामथमे

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

धविग्रहम् ॥ ज्येष्ठराजंवृषभंकेतुमेकंसनः शृण्वन्नूतिभिः सीदशश्वत् ॥ ९७ ॥ वि
घ्नेश्वरायवरदायशुभप्रियायलंबोदरायविकटायगजाननाय ॥ नागाननायश्रु
तियज्ञविभूषितायगौरीसुतायगणनाथनमोनमस्ते ॥ ९८ ॥ त्वंदेवविघ्नदल
नेतिचसुंदरेतिभक्तप्रियेतिसुखदेतिफलप्रदेति ॥ विद्याप्रदेत्यघहरेतिचयेस्तु
वंतितेभ्योगणेशवरदोभवनित्यमेव ॥ ९९ ॥ नमोनमः कारणकारणायतेनन-
मोनमोमंगलमंगलात्मने ॥ नमोनमोवेदविदांमनीषिणेह्युपासनीयायनमो
नमस्ते ॥ १०० ॥ नमोनमः शाश्वतशांतिहेतवे क्षमादयापूरितचारुचेतसे ॥
गजेंद्ररूपायगणेश्वरायते परस्यपुंसः प्रथमायसूनवे ॥ १०१ ॥ नमामिदेवंव
रदंगणेशंलंबोदरंभास्करमेकदंतं ॥ अनादिनाथंजगदीशमेकंषडक्षराख्यं ९
भगवन्नमामि ॥ १०२ ॥ गजवदनमचिंत्यंतीक्ष्णदंष्ट्रंत्रिनेत्रंबृहदुदरमशेष-

Joint project of the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(10A)

भू तराजंपुराणं ॥ अमरवरसुपूज्यंरक्तवर्णंसुरेशंपशुपतिसुतमीशंविघ्न
राजंनमामि ॥१०३॥ ॥श्रीमहेश्वरउवाच॥ ॥विनायकस्तवंपु-
ण्यंसर्वपापप्रणाशनम् ॥ स्तवराजमितिख्यातंसर्वसिद्धिकरंपरम् ॥१०४॥
नृणांचसततंरक्षेद्रुजानांचविशेषतः॥ यःपठेच्छृणुयाद्वापिसर्वपापैःप्रमु
च्यते॥१०५॥ रूपंवीर्यंबलंप्रज्ञांयशआयुष्यवर्द्धनम् ॥ मनीषांसिद्धिमारो
ग्यंश्रियंचैवाक्षयांतथा॥१०६॥ सर्वलोकाधिपत्यंचसर्वलोकविराजितम् ॥
प्राप्याष्टगुणमैश्वर्यंप्राप्यभूमिंचशाश्वतीम् ॥१०७॥ उद्धृत्यसप्तमंवंशंदु
स्तरात्भवसागरात् ॥ कांचनेनविमानेनशतनागयुतेनच ॥१०८॥ विचरत्य
खिलांल्लोकान्सशरीरोगणाधिपः॥ समात्प्रियोभवेन्मर्त्यःसर्वदेवप्रियस्त-
था॥१०९॥ प्रियोविनायकस्यापिप्रियोस्माकंविशेषतः ॥ संकल्पसिद्धिः

the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(11)

ग॰ सर्वज्ञःसर्वभूतहितेरतः ॥ ११० ॥ स्तवराजंजपेन्मर्त्यःसुहृद्भिःसहमोदते ॥
१० स्तवराजंजपेद्भक्त्याभावयुक्तस्यधीमतः ॥ १११ ॥ अस्मिन्जगत्त्रयेप्यस्तिना
साध्यंनचदुस्तरम् ॥ तस्मात्सर्वप्रयत्नेनस्तवराजंजपेन्नरः ॥ ११२ ॥ सकृत
जप्त्वाभवेन्मुक्तोदुःखभेषुभयेषुच ॥ सर्वंनरतिपापानंब्रह्मभूतोभवेन्नरः ११३
मा तस्मात्संपूजितोह्येषोधर्मकामार्थमुक्तिषु ॥ स्तवराजंजपेद्भक्त्यासवेवदेवोविनाय
कः ॥ ११४ ॥ स्तवराजमिमंस्तवोत्तमंभजपन्यश्चपठन्स्मरन्नपि ॥ कुरुतेशु
भकर्ममानवःशुभमप्येतिफलानिचाशुते ॥ ११५ ॥ बहुनात्रकिमुक्तेनस्तव-
राजमिमंजपन् ॥ सर्वंतद्भद्रमाप्नोतियद्यदिच्छतिशाश्वतम् ॥ ११६ ॥ स्तवरा
नामप्यशेषाणांवरिष्ठोयंमतस्तवः ॥ स्तवराजमितिख्यातिंतस्माल्लोकेषुगी १०
यते ॥ ११७ ॥ ॥ नंदिकेश्वरउवाच ॥ ॥ इत्थमेषःस्तवप्रोक्तःप्रश्नः

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(11A)

स्तः शंभुनास्त्वयम् ॥ ११८ ॥ तस्मादनेनस्तोत्रेणस्तवराजेनधीमता ॥ स्मृतिंस्तुतिंज
पंचैवकुर्वन्निर्वाणमेष्यति ॥ एतत्तेकथितंब्रह्मन्क्रमेणपरिपृच्छतः ॥ ११९ ॥ स्तव-
राजस्यमाहात्म्यंस्वरूपंच विशेषतः ॥ उक्तमेवंविधंब्रह्मन्किंभूयः श्रोतुमिच्छसि
॥ १२० ॥ कार्यंमेसिद्धिमायातुप्रसन्नेत्वयिधातरि ॥ विघ्नानिनाशमायांतुसर्वका
र्याणिसिद्धिदः ॥ १२१ ॥ वक्रतुंडमहाकायसूर्यकोटिसमप्रभ ॥ अविघ्नंकुरुमेदे
वसर्वकार्येषुसर्वदा ॥ १२२ ॥ यंब्रह्मवेदांतविदोवदंतिपरंप्रधानंपुरुषंतथान्ये
॥ विश्वोद्गतेःकारणमीश्वरंवातस्मैनमोविघ्नविनाशनाय ॥ १२३ ॥ एतत्तेकथितं
ब्रह्मन्क्रमेणपरिपृच्छतः ॥ विनायकस्यमाहात्म्यंप्रतिष्ठार्चनयोर्विधिम् ॥
१२४ ॥ प्रशंसाब्रह्मगायत्र्याः कल्पस्तस्याश्चशोभनः ॥ स्तवराजस्यमाहात्म्यं-
स्वरूपंचविशेषतः ॥ १२५ ॥ मयातेकथितंब्रह्मन्किमन्यच्छ्रोतुमिच्छसि ॥ ग-

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(12)

ग. णेशस्तवराजेनसर्वसिद्धिमवाप्नुयात् ॥ १२६ ॥ ॥ इतिश्रीभविष्योत्तर- ६

११ पुराणेभष्टांशेचतुर्थकल्पेब्रह्मनंदिकेश्वरसंवादेशिवप्रोक्तंगणेशस्तवराज-

स्तोत्रंसंपूर्णम् ॥ ॥ श्रीगजाननार्पणमस्तु ॥ ॥ छ ॥ ॥ छ

मुक्काममुंबईयेथें

ज्ञानदर्पणछापखान्यांत छापिलें.

सन १८५२

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(13)

इतिश्रीमद्गणेशस्तवराजःसंपूर्णः

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com